## क्षेत्रियच् परक्षेत्रे चिकित्स्यः। (९२/१८९२)

क्षेत्रियच् इति निपात्यते परक्षेत्रे चिकित्स्यः इत्येतस्मिन्[1] वाक्यार्थे पदवचनम्। परक्षेत्राद्[2] तत्र इति [3]सप्तमीसमर्थात् चिकित्स्यः इत्येतस्मिन्नर्थे घच् प्रत्ययः परशब्दलोपश्च निपात्यते। परक्षेत्रे चिकित्स्यः क्षेत्रियो व्याधिः। क्षेत्रियं कुष्ठम्। परक्षेत्रं जन्मान्तरशरीरम्, तत्र चिकित्स्यः क्षेत्रियः। असाध्यः प्रत्याख्येयो व्याधिरुच्यते। नामृतस्य निवर्तते इत्यर्थः। अथ वा क्षेत्रियं विषम् यत् परक्षेत्रे परशरीरे संक्रमय्य चिकित्सते। अथ वा क्षेत्रियाणि तृणानि [4]यानि सस्यार्थे क्षेत्रे जातानि चिकित्स्यानि [5]नाशयितव्यानि। अथ वा क्षेत्रियः पारदारिकः। परदाराः परक्षेत्रं तत्र चिकित्स्यः निग्रहीतव्यः। सर्वं चैतत् प्रमाणम्॥

## इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा। (९३/१८९३)

इन्द्रियम् इत्यन्तोदात्तं शब्दरूपं निपात्यते। रूढिरेषा चक्षुरादीनां [6]करणानाम्। तथा च व्युत्पत्तेरनियमं दर्शयति। इन्द्रशब्दात् षष्ठीसमर्थात् लिङ्गम् इत्येतस्मिन्नर्थे घच्प्रत्ययो[7] भवति। इन्द्रस्य लिङ्गम् इन्द्रियम्। इन्द्र आत्मा, स चक्षुरादिना करणेनानुमीयते। नाकर्तृकं करणमस्ति[8]। इन्द्रेण दृष्टम्[9]। तृतीयासमर्थात् प्रत्ययः। आत्मना दृष्टम् इत्यर्थः। इन्द्रेण सृष्टम्,[10] आत्मना सृष्टम्[11]। तत्कृतेन शुभाशुभकर्मणोत्पन्नम् इति कृत्वा। इन्द्रेण जुष्टम्,[12] आत्मना[13]जुष्टं, सेवितम्। [14]तद्द्वारेण विज्ञानोत्पादनात्। इन्द्रेण दत्तम्, आत्मना विषयेभ्यो दत्तं यथायथं ग्रहणाय। इतिकरणः प्रकारार्थः। सति सम्भवे व्युत्पत्तिरन्यथाऽपि कर्तव्या, [15]रूढेरनियमात् इति। वाशब्दः [16]प्रत्येकमभिसम्बध्यमानो विकल्पानां स्वातन्त्र्यं दर्शयति॥

## तदस्यास्त्यस्मिन्निति मतुप्। (९४/१८९४)

तत् इति प्रथमा समर्थविभक्तिः। अस्य अस्मिन् इति [17]प्रत्ययार्थौ। अस्ति इति प्रकृतिविशेषणम्। इतिकरणो विवक्षार्थः। तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे[18]वा मतुप् प्रत्ययो भवति, यत् तत् प्रथमासमर्थमस्ति चेत् तद् भवति। [19]अस्त्यर्थोपाधिकं चेद् तद्भवति इत्यर्थः। इतिकरणस्ततश्चेद् विवक्षा। गावोऽस्य सन्ति गोमान् देवदत्तः[20]। वृक्षाः अस्मिन् सन्ति वृक्षवान् पर्वतः। यवमान्। प्लक्षवान्। इतिकरणाद् [21]विषयनियमः।

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥ (म.भा. २.३९३)

---

1. विषये इत्यधिकम् फ. 2. शब्दात् इत्यधिकम् फ. 3. सप्तमीसमर्थात् नास्ति फ. 4. यानि नास्ति फ. 5. विनाशयितव्यानि ड. फ. 6. करणानाम् नास्ति फ. 7. निपात्यते फ, वर्तते ड. 8. इति इत्यधिकम् फ. 9. इन्द्रदृष्टम् इत्यधिकम् ड. ह. 10. इन्द्रसृष्टम् इत्यधिकम् ड. 11. इत्यर्थः इत्यधिकम् फ. 12. इन्द्रजुष्टम् इत्यधिकम् ब.फ. 13. जुष्टं नास्ति फ. 14. तेन द्वारेण ड. 15. रूढिष्वनियमात् ब. ड, रूढिषु नियमात् क. 16. प्रत्येकम् नास्ति ग. 17. प्रत्ययार्थे ह. 18. च फ, नास्ति ह. 19. अस्त्युपाधिकम् क. 20. यवमान् देवदत्तः इत्यधिकम् ह. 21. विषयनिमयार्थः ड.फ.